## ॥श्रीगुरुवायुपुराधीश अष्टोत्तरशतनामावलिः॥

## Guruvayurappan Ashtottaram composed by Brahmasri Anantharama Dikshitar

ॐ श्रीकृष्णाय नमः
वातपुराधीशाय
भक्तकल्पद्रुमाय
प्रभवे
रोगहन्त्रे
परंधाम्ने
कलौ सर्वसुखप्रदाय
वातरोगहराय
विष्णवे
उद्धवादिप्रपूजिताय १०
भक्तमानससंविष्टाय
भक्तकामप्रपूरकाय
लोकविख्यातचारित्राय
शङ्कराचार्यपूजिताय
पाण्ड्येशविषहन्त्रे
पाण्ड्यराजकृतालयाय
नारायणकविप्रोक्तस्तोत्रसंतुष्टमानसाय
नारायणसरस्तीरवासिने
नारदपूजिताय
विप्रनित्यान्नदात्रे २०
विविधाकृतिशोभिताय
तैलाभिषेकसन्तुष्टाय
सिक्ततैलार्तिहारकाय
कौपीनदरुजाहन्त्रे
पीताम्बरधराय
अव्ययाय
क्षीराभिषेकात् सौभाग्यदात्रे
कलियुगप्रभवे
निर्माल्यदर्शनात् भक्तचित्त-
चिन्तानिवारकाय
देवकीवसुदेवात्तपुण्यपुञ्जाय
अघनाशकाय
पुष्टिदाय
कीर्तिदाय
नित्यकल्याणततिदायकाय
मन्दारमालासंवीताय
मुक्तादामविभूषिताय
पद्महस्ताय
चक्रधारिणे
गदाशङ्खमनोहराय
गदापहन्त्रे ४०
गाङ्गेयमोक्षदात्रे
सदोत्सवाय
गानविद्याप्रदात्रे
वेणुनादविशारदाय
भक्तान्नदानसन्तुष्टाय
वैकुण्ठीकृतकेरलाय
तुलाभारसमायातजनसर्वार्थदायकाय
पद्ममालिने
पद्मनाभाय
पद्मनेत्राय ५०
श्रियःपतये
पादनिःसृतगाङ्गोदाय
पुण्यशालिप्रपूजिताय
तुलसीदामसन्तुष्टाय
विल्वमङ्गलपूजिताय
पून्तानविप्रसंदृष्टदिव्यमङ्गलविग्रहाय
पावनाय
परमाय

धात्रे
पुत्रपौत्रप्रदायकाय ६०
महारोगहराय
वैद्यनाथाय
वेदविदर्चिताय
धन्वन्तरये
धर्मरूपाय
धनधान्यसुखप्रदाय
आरोग्यदात्रे
विश्वेशाय
विधिरुद्रादिसेविताय
वेदान्तवेद्याय ७०
वागीशाय
सम्यग्वाक्छक्तिदायकाय
मन्त्रमूर्तये
वेदमूर्तये
तेजोमूर्तये
स्तुतिप्रियाय
पूर्वपुण्यवदाराध्याय
महालाभकराय
महते
देवकीवसुदेवादिपूजिताय ८०
राधिकापतये
श्रीरुक्मिणीसत्यभामासंलालितपदाम्बुजाय
कन्याषोडशसाहस्रकण्ठमाङ्गल्यसूत्रदाय
अन्नप्राशनसम्प्राप्तबहुबालसुखप्रदाय
गुरुवायुसुसंक्लृप्तसत्प्रतिष्ठाय
सुरार्चिताय
पायसान्नप्रियाय
नित्यंगजराशिसमुज्ज्वलाय
पुराणरत्नपठनश्रवणानन्दपूरिताय
माङ्गल्यदाननिरताय ९०
दक्षिणद्वारकापतये
दीपायुतोत्थसज्ज्वालाप्रकाशितनिजालयाय
पद्ममालाधराय
श्रीमते
पद्मनाभाय
अखिलार्थदाय
आयुर्दात्रे
मृत्युहर्त्रे
रोगनाशनदीक्षिताय
नवनीतप्रियाय १००
नन्दनन्दनाय
रासनायकाय
यशोदापुण्यसंजाताय
गोपिकाहृदयस्थिताय
भक्तार्तिघ्नाय
भव्यफलाय
भूतानुग्रहतत्पराय
दीक्षितानन्तरामोक्त-
-नामसुप्रीतमानसाय १०८
श्रीगुरुवायुपुराधीशाय नमः